CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिसम्बर २००१ ईसवीयाब्दः R.N.I Regd. No. UPBIL / 1998/1485

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भारतोदय:

भारते भातु भारती

शतं वन्दनम् !!

–मिश्रोऽभिराजराजेन्द्रः, आचार्यः संस्कृतविभागे
हिमाचलप्रदेशविश्वविद्यालयः, शिमला–५ (हि० प्र०)

काशते जीवन–व्योम्नि या चन्द्रिका
चन्द्रिकाया नु तस्याः शतं वन्दनम्।।

(१)

भूतले सन्ति कूपास्तडागा न किं?,
भूरि तोयास्तटिन्योऽवदाता न किम्?।
भूधरोत्तुङ्ग–शृङ्गोच्छलद् वारयो
मञ्जुमञ्जीरनादाः प्रयाता न किम्?।।
याति शान्तिं तृषा यत् प्रपा–वारिणा।
हन्त ! तस्याः प्रपायाः शतं वन्दनम्।।

(२)

का न सन्तीह रात्रौ समृद्धिङ्गताः
कैरवाणां वनी, यूथिका ह्लादिनी।
दृष्टि–बन्ध–क्षमा नव्य–नीहारिका
वाटिका चापि वासन्तमाकन्दिनी ।।
किन्तु यद्गन्धवातैर्जगन् माद्यते।
मल्लिकाया नु तस्याः शतं वन्दनम्।।

(३)

प्रावृषि द्योतते किन्नं सौदामिनी?
किन्न खद्योत–माला मुधा भासते?।
काननोद्दामदावैर्दिगन्ताः क्वचिद्
भास्करालोकविस्तारणं तन्वते।।
किन्तु देवालये शान्त–शान्तं ज्वलद्,
दीपिकाया नु तस्याः शतं वन्दनम्।।

(४)

आविलं कुर्वते सौम्य–शान्तं जलं
ध्वस्त–शैवाल–माला बकाः कच्छपाः।
भङ्गुरप्राणयात्रा झषाश्चञ्चलाः
कौञ्चकारण्डवाश्चाऽप्यपास्तत्रपाः।।
धारयन्त्यास्तथाऽप्यम्बुजाच्छादनम्।
वापिकाया नु तस्याः शतं वन्दन्।।

[शेषांशः २ पृष्ठ]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरभाष– 0133-454295 [ज्वालापुरम्] तारगृहम्– महाविद्यालयः[ज्वालापुरम्]

भारतोदयः

संस्कृत–मासिकपत्रम्

वर्षम्– ६२ अङ्कः – ६

सम्पादकः
डॉ० हरिगोपालशास्त्री
व्याकरणाचार्यः
एम्० ए०, पी–एच्० डी०
राष्ट्रपति–पुरस्कृतः

सह–सम्पादकः
डॉ० केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम्० ए०, पी–एच्० डी०

प्रबन्ध–सम्पादकः
डॉ० अजयकौशिकः
एम्० ए०, साहित्याचार्यः

प्रकाशकः
गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम्–२४६४०५ (उत्तराञ्चलम्)

शुल्क–विवरणम्

प्रत्यङ्कम्	–	५/–
वार्षिकम्	–	५०/–
आजीवनम्	–	५००/–

विषयानुक्रमणिका

१.	श्रुति–सुधा	महर्षिदयानन्दसरस्वती	३
२.	सेवाजीवी सौमित्रिः लक्ष्मणः(३)	श्री जोश्युलः सूर्यनारायणमूर्तिः	४
३.	शिक्षण–पद्धतयः	डॉ० उदयनाथ झाः 'अशोकः'	७
४.	स्वर्गस्य ध्वंसावशेषे (३)	मूललेखकः श्रीजयशङ्करप्रसादः संस्कृतरूपान्तरकारः श्रीरूपनारायणपाण्डेयः	८
५.	नमो भगवते श्रीरमणाय	श्री पं० रवीन्द्रनाथगुरुः (ब्रह्मचारी)	१०
६.	श्रीवृन्दावनस्थ–भक्तिमन्दिरस्य स्थापनावसरे	डॉ० वासुदेवकृष्णः चतुर्वेदी	११
७.	मौक्तिकानि अनुभवस्य	डॉ० रमाशङ्करतिवारी	१२
८.	छत्रबन्ध–काव्यम्	डॉ० वासुदेवकृष्णः चतुर्वेदी	१३
९.	बाल–शिक्षा	डॉ० बलवीरदत्तशास्त्री	१४
१०.	निरुक्ते चित्रिता नार्यः	मञ्जुकुमारी पाण्डेय	१६
११.	महाविद्यालयसमाचाराः	सम्पादकः	१६
१२.	डॉ० मण्डनमिश्राः दिवङ्गताः	डॉ० जगदीशशर्मा	१६
१३.	वेदनानुभयूते	डॉ० केशवप्रसादगुप्तः	२०
१४.	मदनमोहनमालवीयः	डॉ० हरिगोपालशास्त्री	२०

प्रथमपृष्ठस्य शेषांशः–

शतंवन्दनम्

(५)

लोकसम्पीडकाः सन्ति भूमौ न किं
स्वार्थसिद्ध्यै कमप्याशु निघ्नन्ति ये।
ध्वंसलीलारसास्ते जगद् रावणा
राघवानप्यसीतान् प्रकुर्वन्ति ये।।
तण्डुलान् पीडयन्त्याः परं कण्डनैः।
कण्डिकाया नु तस्याः शतं वन्दनम्।।

(६)

भृङ्गमालाऽनिशं पुष्पवल्लीश्रिता,
तद् रसैरात्मतोषं विधत्ते न किम् ?।
लम्बचञ्चुर्विहङ्गोऽपि बद्धादरो
भिन्नगर्भं प्रसूनं विधत्ते न किम्?।।
किन्तु पुष्पासवैर्या प्रसूते मधु।
मक्षिकाया नु तस्याः शतं वन्दनम्।।

(७)

पूजिता येऽभिराजेन हृन्मन्दिरे
हन्त! जाता भुजङ्गास्त एवोत्कटाः।
भाग्यभानूदये ते बभूवुर्घनाः
स्निग्धसौजन्यवात्सल्ययोः का कथा?
सत्यपीत्थं यया वर्धितोऽहं सदा।
चण्डिकाया नु तस्याः शतं वन्दनम्।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भविक–भरित–भारतोदयोऽयं भव–विभवोद्भवभावनाभिलाषी।
भगवति भुवि भक्ति–भावभाजां भव–भय–भाव–भरं भ्रियान्नभूमन्।।

X X X X

निशम्यतां लेख–ललाम–सञ्चय–प्रकाशने येन कृतोऽतिनिश्चयः।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः'।।

वर्षम्– ६२ | मार्गशीर्ष २०५८ विक्रमाब्दः, | दिसम्बर २००१ ईसवीयाब्दः | अङ्कः – ६

श्रुति–सुधा

ओ३म् त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृढहासः किरणा नैजन्।।

–ऋग्वेद १/६३/१

पदार्थः –

(त्वम्) (महान्) गुणैरधिकः। (इन्द्रः) परमैश्वर्यप्रदः। (यः) उक्तार्थः। (ह) किल। (शुष्मैः) बलादिभिः। (द्यावा) प्रकाशम्। (जज्ञानः) प्रसिद्धः। (पृथिवी) भूमिः। (अमे) गृहे। (धाः) दधासि। (यत्) ये। (ह) प्रसिद्धम्। (ते) तव। (विश्वा) सर्वे। (गिरयः) शैला मेघा वा। (चित्) अपि। (अभ्वा) नोत्पद्यते कदाचित् तेन कारणेन सह वर्त्तमानाः। (भिया) भयेन। (दृढहासः) दृंहिताः। (किरणाः) कान्तयः। (न) निषेधे (ऐजन्) एजन्ति।

भावार्थः –

मनुष्यैर्यः परमेश्वरः स्वकीयसामर्थ्यबलदिभिः सर्वं जगद् रचयित्वा स्वसामर्थ्येन दृढं धरति, स एव सर्वदोपास्यः। ये सूर्यलोकेन स्वकीयाकर्षण–गुणेन पृथिव्यादयो लोका ध्रियन्ते, सोऽपि परमेश्वरेण रचितो धारित इति बोध्यम्।

– महर्षि दयानन्दसरस्वती

[ऋग्वेददभाष्यम्, तृतीयो भागः, १५२ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेवाजीवी सौमित्रिः लक्ष्मणः (३)

–श्री जोश्युलः सूर्यनारायणमूर्तिः
द्वारा श्री बालचन्द्र,११/६७ आगराहरम,
चल्लापाली–५२११२६ कृष्णा (आन्ध्रप्रदेशः)

आश्रमं निर्माय स्वस्याश्रयं कल्पयित्वा कष्टेषु सहकुर्वन् लक्ष्मणो रामस्य पितेवाभातीत्यहो रामस्य रामत्वम्। यदनुकर्तव्यं सर्वेषामिह मानवसमाजेन। औदार्यमेतद् रामस्य कृतज्ञता च। सा च तथाविधा लक्ष्मणस्य भावज्ञता चेति तौ भ्रातरौ वन्दनीयावस्माभिर्यावदियं सृष्टिर्वर्तते जगति। सीतायाः किं वा अभिलषितं रामेण च। किं वा तौ भावयतः? इति तदवगम्य सञ्चचार तदनुगुणं लक्ष्मणः। यदि परस्परं सोदरभावः इत्थं वर्तते चेदतो वाञ्छनीयं किमन्यद् भवति? एतदेव एनौ भ्रातरौ दृष्ट्वा यदस्माभिरभ्यस्तव्यं निर्मलं निष्कामं च सौभ्रात्रम्। यदस्माकमावश्यकं तदर्थमेव न, किन्तु तस्याप्यावश्यकम् (यदि) तदर्थं च प्रयतितव्यं शुद्धेनैव चित्तेनेत्ययं नयः (नीतिः) श्रेयस्कर अस्माभिराचरणीयः। तदेवोभयोरपि क्षेमापादकं भवति।

मायाविनं हरिणमागतं दृष्ट्वा लक्ष्मणस्य मनसि शङ्का समुत्पन्ना। तन्मायायां न पतितव्यमिति च सूचयामास। परन्तु रामः **'अद्यावधि न सीतया किमप्यभिलषितम्। अद्य ईदृशयाः सीताया वाञ्छितमिदं कथं तिरस्कुर्वः? यदि लभ्यते, तदानयिष्यामि। यदि वायमन्यथा परिज्ञायते, तदावश्यमेव संहरिष्यामि।'** इत्युक्त्वा तमनुससार।

'प्रायस्समापन्नविपत्तिकाले
धियोऽपि पुंसां मलिनी भवन्ति।'

इति खल्वार्योक्तिः? तस्येदं निदर्शनमभवत्। **'सीतासंरक्षणे जागरूकस्तिष्ठ'** इत्युक्त्वा जगाम सीतापतिः श्रीरामः।

स च 'हा! लक्ष्मण! इत्याक्रोशन्नाहतः खलु। मायावी च सः मारीचः रामस्यं करुणस्वरमनुकृत्याक्रुश्यैव हतोऽभवत्। येन सीता–हृदये संदेहस्समजनि रामसंक्षेमविषये। **'गत्वा पश्य भवत् भ्राता'** इत्यादिदेश। तस्यापदिति कथं संभाव्यते? असम्भवा खल्वियम्। य एक एव जनस्थाने असहायः शूरस्सन् चतुर्दशसहस्रान् राक्षसान् जघान, तस्य नापद् भवति। न ते भीतिरस्तु। तदिदं मायाविनश्चेष्टितं किमपि यद् रामस्याग्रे न फलति, व्यर्थीभवति। **'अस्मिन् समये त्वां विसृज्य दूरगमनं न मे युक्तं भवति।'** इति तस्य वचनं नाङ्गीकृतं सीतया, अपि च अवाच्यमवोचत् सा। सोढं तदपि तेन महात्मना (येनोक्तं पुरा सीताभूषणदर्शनसन्दर्भे (**'नूपुरे त्वभिजानामि नित्यं पादाब्जवन्दनात्'**) पुण्यात्मना लक्ष्मणेन। सीतायाः परुषं वाक्यं श्रुत्वापि सः तत् स्त्रीजातिलक्षणमित्यमन्यत। किन्तु यदा सीता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यदि त्वं न गच्छसि (किं तदिति ज्ञातुं) तर्हि अहं प्राणांस्त्यक्ष्यामि।' इत्यवोचत्, तदा स च तदवस्थायां तां द्रष्टुमशक्तः सन् जगाम रामस्याभिमुखं यः समागच्छति मारीचं हत्वा।

लक्ष्मणमागच्छन्तं दृष्ट्वा रामः किमर्थमागच्छसीति पप्रच्छ। किमर्थं सीतामेकाकिनीं त्यक्त्वागच्छसीति चापृच्छत्। वृत्तान्तं श्रुत्वापि रामः **'स्त्री–स्वभावतः, भीत्या, अज्ञानेन वा सीतया यदुक्तं तदनुसृत्य तवेत्थमिहागमनं न धर्मसम्मतम्, एतदयुक्तम्।'** इत्याह। अथ च –**'नाकरोः शासनं मम।'** इदमपि सोढं लक्ष्मणेन। किमर्थं स एवानुसृत्यात्रागतः? सर्वस्वं त्यक्त्वा सेवापरमार्थसाधनाय इहागताय तस्मै किमिदमेव वा बहुमानम् एवमप्यचिन्तयन् अग्रजस्य निश्चयमेवाङ्गीचकार। नान्यथा तेनोक्तं किञ्चिदपि। उद्रिक्ता सीता तमवाच्यमुवाच। ततो रामसमीपमागतस्य स्वस्य रामस्यापि वचनं न सान्त्वनमभवत्। सीतया मृतिप्रयत्नमसहमान इत आगतः। एवमिहागमनमपि, अधर्मतयैव निर्धारितं भ्रात्रा यस्तस्यं दैवम्। सर्वस्याप्येतस्य कथं वा तेन प्रतिस्पंदितमिति न ज्ञायते। तथाविधः सहनशीलः गम्भीरश्च लक्ष्मणः। सर्वमेतन्नैतेन परिगणितमथवा विस्मृतं भवेत्। भ्रातृवच एव शिरसि धारयन् वर्तते। तथैव तेनाभ्यस्तं प्रवर्तनमस्ति।

सीता तु वस्तुतस्तदनन्तरं पश्चात्तप्ता स्वीय–प्रवृत्तिं प्रतीति ज्ञायते। पुनस्सा तं रावण–वधानन्तरमेवापश्यत्। तदा च सा यथा अग्निप्रवेशं कर्तुमुद्युक्ता, तस्यै अग्नि– प्रज्वालन–कृत्यमपि लक्ष्मणस्यैव शिरसि पतितम्। तदपि कृतं तेन। किं वा तस्य सुशिक्षितत्वमित्याश्चर्यं भवति।

वस्तुतः सीतायाश्चापि मनसि लक्ष्मणं प्रति न कदाप्यन्यथाभावः। केवलं दौर्भाग्यप्रभावेणैव तथा कथितं तदा तया, इत्येतत् सत्यम्। लक्ष्मणप्रेषणानन्तरमेवारण्येऽतिथिमिवागतं रावणं दृष्ट्वा स्वकीयं देवरं प्रति चिन्तनं करोति सीता। यथा–

'रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा।
स भ्राता लक्ष्मणो नाम धर्मचारी दृढव्रतः।।
X X X X
अन्वगच्छद् धनुष्पाणिः प्रव्रजन्तं मया सह।'

तथैव लङ्कायां स्वसमीपमागतौय हनूमते च लक्ष्मणं प्रति तस्य कथनमवलोकनीयं यथा–

'पितृवत् वर्तते रामे मातृवन्मां समाचरन्।
मत्तः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मण !।।
X X X X
यं दृष्ट्वा राघवो नैव वृत्तमार्यमनुस्मरन्।

इतीत्थं लक्ष्मणं दृष्ट्वा रामः पितरमपि विसस्मारेति तयोक्तम्। येन सीतया ज्ञातमिति ज्ञायते यद् रामस्यापि पितृतुल्यो लक्ष्मण इति।

सीतापहरणं रामस्यात्यन्तं भृशञ्च दुःखदायकमभवत्। तदा तस्याश्वासयिता कः? तदनुजो लक्ष्मण एव। एकदा रामः सीतावियोगमसहमानः उद्रिक्तः उग्रश्चाभवत्। लक्ष्मणस्य हस्ताक्षरमाहृत्य धनुषि संदधे। युगान्ताग्निरिवाबभौ। कस्मिन्नयं कोपः? **'यद्यहं कुपितः, न कोऽपि मां वारयितुं शक्नोति, निर्वीर्यं मां भावयन्ति देवाः। ते यदि मह्यं सीतामादाय न दास्यन्ति, तर्हि दर्शयिष्याम्यद्यैव मदीयं पराक्रमं तेषाम्। पश्य, सचराचरमेतत् सर्वं जगत्, त्रींश्च लोकान् नाशयामि।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोककर्तापि यदि लोके मृदुर्दान्तः लोकहितञ्च परिदृश्यते, तं सर्वे देवाः भूतानि च निर्वीर्यं भावयन्ति। लक्ष्मण! पश्य, मामाश्रित्य गुणोऽपि दोषवत् परिणतः इत्याह भगवान् श्रीरामः।

विश्वमेव नाशयामीति प्रलयकालरुद्र इव बभासे (अत्र रामे विष्णुर्दृश्यते) क्रोधः कुत्र वा मानवं नयतीति कविना एतदत्र सूचितम्। लक्ष्मणे यः क्रोधः भगवत्या सीतया प्रदर्शितः, सोऽपि **'आत्मनः क्रोध एवात्मनः शत्रुः'** इत्यस्याः सूक्तेर्लक्ष्यं वर्तते, इत्यवगन्तव्यम्।

तदा लक्ष्मणः भ्रातरं प्रार्थयति यत्– आर्य! पुरा त्वं मृदुर्भूत्वा सर्वभूतहिताकाङ्क्षी दान्तोऽभवः। अद्य कोपस्य वशमागत्य सहजस्य स्वभावस्य परित्यागः न युक्तः। चन्द्रे लक्ष्मीः, सूर्ये प्रभा, वायौ गतिः, भूमौ च क्षमा, इत्येताः सर्वा यथा सहजास्तथैव त्वय्यपि कीर्तिः सहजा, या च क्षमया सिद्धा। एकेन कृतस्यापराधस्य कृते सर्वलोकसंहरणमयुक्तम्। राम! पुरा त्वयैवाहमनेकश इत्थं प्रबोधितः, शासितश्च। तुभ्यं बोधयितुं के समर्थास्सन्ति? साक्षाद् बृहस्पतिर्वास्तु, न ते बोधयितुं समर्थः। हे महाप्राज्ञ! तव बुद्धिर्न देवैरपि प्राप्यते, लब्धुं च न शक्यते। अनेन शोकेन निद्राणं ते ज्ञानं प्रबोधयाम्यहम्। इत्याश्वासयामास। 'स यो वा को वा भवतु, तमन्विष्यावः, संहरिष्यावश्च तदा तम्।' इति च वदति। किन्तु ततः परं पुनस्सुग्रीवे रामस्य क्रोधं पश्यन् सोढुमशक्तः सुग्रीव–सकाशं गत्वा स्वीयं च कोपमप्रकटयत्।

एवमेव सुग्रीवस्याभिषेचानन्तरं विरहितं लक्ष्मणः राममाश्वासयति–

'अहं तु खलु ते वीर्यं प्रसुप्तं प्रतिबोधये।'

वाल्मीकिकवेर्वचनं वर्ततेऽत्र, तदवलोकनीयं यथा–

'लक्ष्मणस्य तु तद् वाक्यं प्रतिपूज्य हि तं शुभम्।
राघवः सुहृदं स्निग्धमिदं वचनमब्रवीत्।।

भगवान् श्रीरामः तदेत्थं कथयति–

वाच्यं यदनुरक्तेन स्निग्धेन च हितेन च।
सत्यविक्रमयुक्तेन तदुक्तं लक्ष्मण! त्वया।।

एष शोकः परित्यक्तः लक्ष्मणः शरदि विषण्णं रामं प्रति कथयति–

'क्रियार्थयोगं मनसः प्रसादं,
समाधियोगानुगतं च कालम्।
सहायसामर्थ्यमदीनसत्त्व !
स्वकर्महेतुं च कुरुष्व हेतुम्।।'

इत्ययं रामस्यापि लक्ष्मणेनोपदेशः कृतः इवाभाति।

इत्थं कर्तव्यज्ञो लक्ष्मणः लोकतत्त्वज्ञोऽपि तत्तत् समयेषु प्रकाशते। न सुग्रीवेण कृतोऽपराधः। स च तस्मिन्नेव यत्ने वर्तते, यदा परिज्ञातं लक्ष्मणेन सीतान्वेषणकृत्यं च न विस्मृतमिति, तदा सः सुग्रीवमेवं वदति–

'दोषज्ञः याति सामर्थ्ये कोऽन्यो भाषितुमर्हति।
वर्जयित्वा मम ज्येष्ठं त्वां च वानरसत्तम ! ।।
सदृशश्चासि रामस्य विक्रमेण बलेन च।
सहायो दैवतैर्दत्तः चिराय हरिपुङ्गव! ।।
यच्च शोकाभिभूतस्य श्रुत्वा रामस्य भाषितम्।
मया त्वं परुषाण्युक्तः तच्च त्वं क्षन्तुमर्हसि ।।'

इत्ययं लक्ष्मणस्य स्वभावः। विशदहृदयं च तस्य निष्कल्मषम्। विनयशीलता, गुणगौरवं, समय–समुचिता प्रवृत्तिः, कार्यदक्षता चेत्यनेके उत्तमाः गुणाः लक्ष्मणे सन्ति, ये समभ्यसनीयाः।

[क्रमशः]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिक्षण–पद्धतयः (Teaching Methods)

–डा० उदयनाथ झा 'अशोकः'
श्री सदाशिवकेन्द्रियसंस्कृतविद्यापीठम्,
पुरी–७५२००१ (उड़ीसा प्रदेशः)

शिक्षा–समाजविज्ञानदृष्ट्या वस्तुतः ता एव शिक्षणविधयः प्रभावशालिन्य साधुतराश्च भवन्ति, याः छात्राणां कृते विभिन्नसामाजिकपरिस्थितिषु अपि व्यवस्थापनं कर्तुं सहायिकाः भवन्ति। याः शिक्षणविधयः सामाजिकव्यवहाराधारिताः भवन्ति, सामाजिकमूल्याधारिताः भवन्ति, तेषामेव महत्त्वदायिकाश्च भवन्ति, ता एव विधयः सामूहिकयोजना–सामूहिकप्रतिक्रिया आदि ज्ञातुं निर्माणं वा कर्तुं छात्रेषु प्राविण्यं प्रतिष्ठापयन्ति। ता एव शिक्षणविधयः साधुतराः भवन्ति, याः बालकेषु जनतन्त्रीयविचारधारान् विकासयन्ति। यथा– योजना प्रणाली, सामूहिकवाद–विवादः, सेमिनारश्च।

सामाजिकदृष्ट्या कस्यापि शिक्षणविधेः महत्त्वं पायन (Payan) महोदयैः त्रिधा प्रविभक्तम् अर्थात् एतेषु त्रिषु सिद्धान्ताधारितेषु एव कापि शिक्षणविधिः सुनिश्चिता भवति।

१. कापि शिक्षणविधिः तावदेव प्रभावशालिनी भवति, यावत्पर्यन्तं कक्षायां ज्ञानं पठितं ज्ञानं कला च व्यक्तेः व्यवस्थापनं सामाजिकस्थितावेव प्राप्तुं सहायिका भवतु। (The Method of teaching is effective only in so for as the skills and knowledges acquired in the class room actually made use of by the individual in his adjustment to social situations)

२. प्राथमिकरूपेण या शिक्षणविधिः कक्षाबहिर्भूतेषु सामाजिकव्यवहारेषु बलप्रदानं करोति (The Method of teaching must place primary emphasis on social behaviour out side the class room.)

३. या शिक्षणविधिः सामाजिकजीवने सक्रियमानानां शक्तीनामुपयोगः करोति, यस्मात् व्यक्तेः सामाजिकव्यवस्थापनस्य योग्यता विकासः स्यात् (The Method of teaching must seek to utilize the social forces operative in the social life in order to develop capacity for social adjustment.)

या शिक्षा संवेगात्मक–व्यवस्थापनपरिपूर्णा भवति, सामाजिक–भावनया ओतप्रोता च भवति, सा एव भवति सामाजिकशिक्षा किं वा सामाजिकाधाराश्रिता शिक्षा किं वा समाजप्रबला शिक्षा। अस्यैवोद्देशस्य कृते शिक्षायाः पाठ्यक्रमाः भवन्तु, शिक्षणविधयः भवन्तु एवं शिक्षणकार्याण्यपि भवन्तु। व्यक्तौ या विधिः एवं प्रकारकाणां भावानां विकासः करोति यत् व्यक्तिः एकाकी न कोऽपि न किमपि अस्ति, समाजे एव अस्ति, तस्य महत्त्वं तथा समाजस्य प्रगतिरेव तस्य व्यक्तेः जीवनलक्ष्यम् अस्ति, सा एव विधिः समीचीना साधुतरा वा भवति। अपि च या शिक्षणविधिः सङ्कुचितनागरिकताभावनायाः निरादरं करोति, अवहेलनां करोति, तिरष्कारञ्च करोति एवं विश्वनागरिकभावनायाः विकासः करोति, सा एव भवति अन्ताराष्ट्रियशिक्षणविधिः। अस्यां विधौ एतादृशं शिक्षणं भवति विभिन्नानां विषयाणां, यस्मात् छात्रेषु अन्ताराष्ट्रियदृष्टिकोणस्य विकासः भवति। यदि अध्यापकेषु अन्ताराष्ट्रियप्रेमभावनायां विश्वासः आस्था न स्यात्, तर्हि छात्रान् प्रति प्रदीयमाना अन्ताराष्ट्रियप्रेरणा, विश्वबन्धुत्वस्य शिक्षा व्यर्थकरी एव स्यात्। अस्माकं संस्कृतौ तु अस्त्येव "वसुधैव कुटुम्बकम्" इति। ❑ ❑ ❑ ❑

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अक्टूबर २००१ मासादग्रे–

स्वर्गस्य ध्वंसावशेषे (३)

मूललेखकः – श्रीजयशङ्करप्रसादः
संस्कृतरूपान्तरकारः – डॉ० रूपनारायणपाण्डेयः
एस्–II/३३०, ब्लाकसंख्या–२ राज्यशिक्षासंस्थान कालोनी
एलनगञ्जः (प्रयाग), इलाहाबाद–२११००२ (उ०प्र०)

[तृतीयः भागः]

संसारस्य विभूतयो यस्मिन् समये चरणयोर्लोटन्ति, स एव समयः पर्वतीयदुर्गसिंहासनस्य बभूव। शेखः क्षमताया ऐश्वर्यमण्डितमूर्तिर्ववृते। लज्जा, मीना, गुलः, देवपालश्च बन्दिवेशे तस्थुः। भयङ्कराः प्रहरिणो दूरे दूरे तिष्ठन्तः, वायोरपि गतिं निरीक्षाञ्चक्रिरे।

यावद् भीषणप्रभावः सम्भाव्यते, सः शेखस्य तस्मिन् सभागृहे बभूव। शेखः पप्रच्छ – 'देवपाल! त्वमस्मिन् धर्मे विश्वसिति, न वा?' 'नैव' इति देवपाल उत्तत्तार। 'तर्हि त्वं मां वञ्चयाञ्चकृषे?' 'नैव, चङ्गेजस्य कारागृहाद् उन्मोचने यदा समरखण्डे तवानुचरैर्मम साहाय्यं विहितम्। अहञ्च तवोत्कोचेन भ्रमेण वा क्रीतः, तदा मयि तवाज्ञापालनस्य नैसर्गिकी वाञ्छा जाता। स्वशत्रुचङ्गेजस्येश्वरीयः कोपः, चङ्गेजं नाशयितुमेका विकटलालसा मनसि सम्बभूव, मया तस्य हत्या चापि कृता। अहं धर्मं मत्वा किमपि कर्तुं जगामेति बोधो भ्रमोऽस्ति।'

'अत्र यावत् तु ममाज्ञानुसारमेव बभूव, परन्तु तस्य अलाउद्दीनस्य हत्या किमिति कृता?' इति दन्तान् घृष्ट्वा शेखो निजगाद। 'अयं मम तस्मात् प्रतिशोधो बभूव!' इत्यविचलभावेन जगाद देवपालः। 'त्वं जानासि यद् अस्मिन् गिरौ शेखः केवलं स्वर्गाधिपतिर्नैव, अपितु हत्यादूतोऽपि।' इति क्रोधेनोवाद शेखः।

"एतद् ज्ञातुमहं नोत्कण्ठ्ये, शेख! प्राणिधर्मे ममाखण्डो विश्वासः। आत्मरक्षार्थम् आत्मप्रतिशोधार्थं च यो नैसर्गिकं जीवित–तत्त्वसिद्धान्तम् अवहिल्य तूष्णीं तिष्ठति, तं मृतकात् कातराद् जीवनविहीनाद् अस्थिमांस–खण्डाच्चातिरिक्तं किमपि नावगच्छामि। मनुष्यः परिवेशं विवेकं विहायानुयाति। अतो मया यत् करणीयमभूत्, तद् मया कृतम्। अधुना त्वं स्वकर्त्तव्यं कर्तुं शक्नोषि।' देवपालस्य स्वरे दृढतासीत्।

भयानकः शेखः स्वसमग्रोद्वेगेन चुक्रोश। स जगाद–'का च त्वमसि स्त्री? तव एतावान् साहसः। मां वञ्चयसे! 'लज्जा स्वकीयं बाह्यम् आवरणं प्रक्षिपन्ती जगाद–'आम्, शेख! अधुना नापेक्ष्यते मयात्मगोपनम्। अहं देवपालस्य प्रणयिनी।' 'तर्हि त्वम् एतान् सर्वान् नेतुं भ्रामयितुं वागमः, किमिति?' 'आवश्यकतया प्रेरितो भूत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथातीव कुत्सितः पुरुषो धर्माचार्यो भवितुं वञ्चयते, तथैवाहमपि स्त्री भूत्वा पुरुषो बभूव। इयमन्या वार्ता यद् लोके पूततमस्य पदार्थस्य धर्मस्याश्रये आकाङ्क्षा क्रीडति। तव पार्श्वे सन्ति साधनानि। मम नैव, अन्यथा ममावश्यकता कस्मादपि न्यूनतरा नाभूत्।' इति लज्जा सकष्टं शश्वास।

शेखो ददर्श, तद्दीप्तं सौन्दर्यम्! यौवनस्यावपतनेऽपि वेगवान् प्रवाहोऽभूत्। यथा चन्द्रिकायां निशायां पर्वताद् निर्झरः पतति। क्षणं यावत् तस्य समग्रोत्तेजना पाल्यपशुतुल्या सौम्या बभूव। स जगाद–

'त्वं हि मम स्वर्गस्य राज्ञी भवितुमर्हसि। यदि मम मते त्वं विश्वसिहि, तर्हि त्वामहं विमोक्तुं शक्नोमि। वद।'

'स्वर्गः, अस्यै पृथिव्यै स्वर्गस्य वावश्यकतास्ति, शेख ? न, न। इयं पृथिवी स्वर्गस्य पणकर्तृभ्यो रक्षणीया भविष्यति। पृथिव्या गौरवं विनङ्क्ष्यति स्वर्गे भूते। अस्या नैसर्गिकता सामान्यस्थितावेव तिष्ठेत्। धरा केवलं वसुन्धरा भूत्वा मानवजातेः कृते जीवतु, स्वाकाङ्क्षाकल्पितस्वर्गाय, क्षुद्रकामाय महतीमिमां धरणीमिमां नरकं मा कुरु। यत्र देवभावस्य प्रलोभने स्थित्वा मनुष्यो राक्षसो न भवेत्, शेख!' इत्युवाच लज्जा।

शेखः प्रस्तरपूर्णघननिभो जगर्ज। स निजगाद– 'जीयेताम्, इमौ वन्दिनौ क्रियेताम्। पुनरहं विचारयिष्यामि। गुल! युष्माकं च प्रथममपराधं क्षाम्यामि। मीने! श्रृणोषि, गच्छ स्वकुञ्जं च पलायस्व। इमौ विस्मर।'

एकस्मिन् दिने बहारा गुलं जगाद– 'चल, द्राक्षामण्डपे सङ्गीतानन्दोऽनुभवितव्यः।' द्वावपि स्वर्गीयसुरायामुन्मत्तौ। मीना तत्र एकाकिनी समुपविष्टा औदासीन्येन गायति स्म।

'स एव स्वर्गस्तु नरकः, यत्र प्रियजन–विच्छेदोऽस्ति। सैव प्रलयनिशा यस्याः कालिमानि विरह–संयोगो विद्यते। तद् यौवनं निष्फलमस्ति, यस्य सहृदयः उपासको नास्ति। सा मदिरा हालाहलोऽस्ति, पापमस्ति। या तन्मधुराधरोच्छिष्टा नैवास्ति। स प्रणयो विषाक्ता क्षुरी, यस्यां कपटोऽस्ति। अत एव हे जीवन! त्वं स्वप्नं मा पश्य, विस्मृतिनिद्रायां शेष्व। सुषुप्तिर्यदि नैवानन्दः, तर्हि दुःखाभावस्त्वस्ति। अस्माज्जागरणात् (अस्या आकाङ्क्षाया अभावस्य च जागरणात्) सा निर्द्वन्द्व–सुषुप्तिः क्वचिच्छोभनतरा मम जीवने।'

तस्मिन् मण्डपे पदं निधातुं बहारा न शशाक, किन्तु गुलः, स तु मूक इवाभूत्। एकस्य स्खलनस्यापराधस्य मनोवेदनायाश्च निर्जनकानने बभ्राम निश्चलचरणोऽपि। एतावति कोलाहलो जातः। समन्तादुद्यमः प्रारेभे। स्वर्गे तातारस्य खानस्याक्रमणमस्तीति परिज्ञातम्।

वर्षाणि यावदाक्रान्तत्वात् स्वर्गविभूति–र्निश्शेषरूपेण नष्टा बभूव। स्वर्गीयाः जीवा अनाहारात् प्रतपन्ति स्म। तदापि मीनाहारं लेभे। अद्य शेखः समक्षं तस्थौ । तस्य शरावके मदिरायाः केऽपि अन्त्या बिन्दवो बभूवतुः। दाहस्य तीव्रवेदनया व्याकुलाहता च बहारा तत्र चुक्षोभ। अद्य वन्दिनोऽपि विमुक्ताः। विस्तृते स्वर्गप्राङ्गणे वन्दिनां प्राणपरित्यागस्य कातरध्वनिर्जुगुञ्ज। शेखः सकृत् तान् विहस्य ददर्श, पुनश्च मीनां प्रत्यवलोक्य जगाद–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'मीने! अद्यान्तिमो दिवसः। अस्मिन् शरावकेऽन्त्याः चुलुकाः सन्ति। अपि मां स्वकरेण पाययिष्यति?' 'शेख! वन्दिनी अस्मि। किमपि कथय?' शेखो दीर्घं निःश्वस्योत्तस्थौ। सः स्वकरवालिकां जग्राह। अत्रान्तरे द्वारम् अपतत्। प्रविशन्तः तातारदेशीयाः शकाः दृष्टाः। शेखस्य निकटे दुर्बलहस्ताभ्यां करवालिका पतात।

द्राक्षायाः शुष्के कुञ्जे देवपालस्य लज्जाया गुलस्य च शवस्य समीपे मीना तूष्णीं तस्थौ। तस्या लोचनयोर्न बभूवुरश्रूणि, न चौष्ठयोः क्रन्दनम्। सा सजीवा अनुकम्पा, निष्ठुरा बभूव।

शकानां सेनापतिरागत्य ददर्श, तस्मिन् दावानलस्य प्रभञ्जने तृष्णकुसुमं सुरक्षितम् अभूत्। स स्वकीयया प्रतिहिंसयान्धो बभूव। गर्जनं कृत्वा पप्रच्छ– 'त्वं शेखस्य सुतासि?' मीना मूर्छितेव नेत्रे उन्मीलितवती। सा विश्वासोपेतया वाण्या जगाद–

पितः! अहं तव लीलास्मि।

'सेनापतिर्विक्रमोतस्य प्रान्तस्य शासको बभूव, परन्तु मीना तेषु स्वर्गस्य ध्वंसावशेषेषु विचचारोन्मुक्ता। यदा सेनापतिरतितरां स्मारयति, तर्हि सा वदति–

'अहमेको भ्रान्तो गोवत्सकोऽस्मि। मां कस्यामपि भग्नशाखायाम् अन्धकारं यापयितुम् अनुमोदस्व। अस्य रजनीविश्रामस्य मूल्यम् अन्तिमं गीतालापं श्रावयित्वा गमिष्यामि।'

न जाने, तस्या अन्तिमो गीतालापः केनापि श्रुतः? न वा श्रुतः।

❑ ❑ ❑ ❑

नमो भगवते श्रीरमणाय

–श्री पं० रवीन्द्रनाथगुरुः (ब्रह्मचारी)
पद्मपुरम्, राजबोडा सम्बरम्–७६८०३६
बरगड़ (उड़ीसाप्रदेशः)

अर्कव्रतीन्द्ररमणो ह्यरुणाचलर्षिः
आत्मैकनिष्ठचरितः स्थिरशान्तमूर्तिः।
इत्यद्भुतैकप्रभवः परमात्मबुद्धिः
ईड्यः स आर्यवर ईश्वरसद्विभूतिः।।

उषः प्रियः सुहृदहो सचराचराणाम्,
ऊर्जःस्वलो यति रतीन्द्रियसौख्यवान् यः।
ऋज्वन्तरस्तमनिशं जितरागदोषम्,
ॠसौख्यदं रमणसद्गुरुमानतोऽस्मि।।

ऌशान्तिदश्च निखिलात्मक एव नित्यम्,
ॡमानसारविषयानिह त्यक्तवान् यः।
एकान्तवासकुशलः खलु शैशवात् तम्,
ऐकात्म्यधीश्वरमहो रमणं नतोऽस्मि।।

ओङ्कारनिष्ठमतिमान् वरदो महर्षिः
औदास्यपद्मतपनोऽमरकीर्त्तिशाली।
अंहोऽग्निदण्डहरणं स्वपदार्पितानाम्,
अज्ञाननाशनपटुं रमणं स्मरामि।।

ॐ शान्तिः! शान्तिः! शान्तिः!

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीवृन्दावनस्थ–भक्तिमन्दिर–स्थापनाऽवसरे

–डॉ० वासुदेवकृष्णः चतुर्वेदी
गतश्रम टीला, मथुरा (उ०प्र०)

(१)

या भक्तिः पुरुषोत्तम–प्रजयिनी गोलोकधामप्रिया
या जाता प्रभुदिव्यदेहप्रमदा नारीस्वरूपाऽद्भुता।
यां वीक्ष्याऽऽह प्रभुः कुरु त्वमधुना जीवस्य शं सर्वथा
सा देवी रसरूपिणी सुविदिता वृन्दावने राजते।।

(२)

या भक्तिः कलिकालदोषग्रसितान् संवीक्ष्य पापान्नरान्
आढ्यान् पण्डितसाधुवेषसहितान् रोगान्वितान् पामरान्।
उद्धाराय समागता कलियुगे या विश्ववन्द्या कलौ
सा देवी रसरूपिणी सुविदिता वृन्दावने राजते।।

(३)

या भक्तिर्व्रजगोपिका हृदयगा श्रीकृष्णलीलाविधिं
साक्षाद् द्रष्टुमिहागताऽत्र विपिने रासेश्वरान्तः स्थिता।
यस्या दर्शनकाङ्क्षिणः सुरवरा लुब्धात्मिकाः सर्वथा
सा देवी रसरूपिणी कलियुगे वृन्दावने राजते।।

(४)

या भक्तिः शिवनारदादिहृदयेष्वाविश्य मुग्धाऽवसत्
प्रह्लाद–ध्रुव–वृत्र–विप्र–शबरी–राजाऽम्बरीषादिकान्।
प्रादायाऽमरतां जहास मुदिता संवीक्ष्य शास्त्राधिकान्,
सा देवी रसरूपिणी कलियुगे वृन्दावने राजते।।

(५)

या भक्तिर्जननीव भक्ततिलकान् संरक्षणायागता
नारीरूपमहो दधार द्रविणे कर्णाटके कामिनी।
शैथिल्यं त्वपहाय यच्च मिलितं मार्गेऽत्र रामाऽभवत्
सा देवी रसरूपिणी कलियुगे वृन्दावने राजते।।

(६)

या भक्तिर्हरिरिच्छया प्रकटिताऽऽमोदाय तस्येच्छया
तस्या दर्शनमाप्य पुण्यपुरुषाश्चक्रुः प्रभोः कीर्तनम्।
कश्चिद् वेणुमवादयत् प्रमुदितः कश्चिन्मृदङ्गं मुदा
वंशीवादनतत्परो नरवरः कश्चिन्ननर्तो मुदा।।

(७)

कश्चित् पीतपटैस्तिरोहितवपुर्नारीव नृत्ये रतः
ह्युच्चैर्हस्तवरेण वक्रचरणः श्रीकृष्णमाकारयत्।
श्रीराधे क्व गतासि ? कृष्णहृदये हेपूर्णचन्द्रानने
भक्त्या कृष्ण उवाच एहि सुमुखे पश्यात्र सद्वैष्णवान्।।

(८)

श्रुत्वागत्य तदैव कृष्णहृदया दृष्ट्वाऽद्भुतं नर्तनं
श्रीकृष्णेन सहैव भावभरिता नृत्याय चक्रे मतिम्।
गोलोकेऽमृतमङ्गले मुनिवराराजग्मुदारैर्युता
चक्रुर्दर्शनमच्युतस्य प्रिययाऽऽश्लिष्टस्य रासस्थले।।

(९)

योगी नारद आजगाम मुदितो वीणां करे धारयन्
श्रुत्वा भक्तिपुरःस्थितेन सहसा कृष्णस्य रासोत्सवः।
गोलोके सततं भवेदनुदिनं मर्त्ये पुना रच्यताम्
श्रीकृष्णः पुनराह नारदमुनिं गोलोक आवश्यकः।।

(१०)

या भक्तिस्तरुणद्वयं प्रमुदिता वैराग्यज्ञानाभिधं
नीत्वा श्री व्रजमण्डलं त्वधिगता वार्धक्यकष्टार्दिता।
दृष्ट्वा स्वस्य मनोहरं निजवपुश्चाश्चर्ययुक्ताऽभवत्
सा देवी रसरूपिणी कलियुगे वृन्दावने राजते।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(११)

या भक्तिर्मुनिनारदं मुनिवरं त्वाहूय हृष्टावने
सौख्याय प्रणनाम साऽपि विविधान् वाक्यानुवाच भृशम्।
वार्धक्यं न जगाम वीक्ष्य सुतयोश्चिन्तापरा याऽभवत्
सा देवी रसरूपिणी कलियुगे वृन्दावने राजते।।

(१२)

या श्रीकृष्णप्रभोः सदैव गमनं विज्ञाय गोलोकतः
श्रीवृन्दाविपिने न मेऽस्ति भवनं यास्ये क्व चिन्तापरा।
कल्याणी पुनराह भक्तितिलका मे मन्दिरे स्थीयतां
सा देवी निजपुत्रभक्तसहिता श्रीविग्रहे दृश्यते।।

(१३)

श्रीमच्छ्रीवरशास्त्रितिलकः श्रीवासुदेवो बुधः
श्रीचैतन्यविहारनामविदिते वृन्दावने भाग्यतः।
श्रीराधाचरणप्रसादकृपया पत्न्याश्च संकल्पतः
भव्ये संस्कृतमण्डपे च कृतवान् श्रीभक्तिसन्मन्दिरम्।।

(१४)

वर्षे सैन्धवभूतखाक्षिकमिते (२०५७) वैशाखमासे सिते
अक्षय्यां तृतीया–तिथौ शनिदिने भक्तिप्रतिष्ठोत्सवे।
श्रीमद्भागवती–कथां च कृतवान् श्रीवासुदेवो बुधः
गोपालस्य चकार यागमतुलं विद्वच्छतैः संयुतः।।

(१५)

भक्त्या युक्तनरास्तथैव भवतः प्रेष्ठायथाऽत्र स्थिताः
तत् किं त्वच्चरणार्चनव्रतरतान् नोदीयते दर्शनम्।
श्रीकृष्णः पुनराह दिव्यजनतामानन्दसंवर्द्धये,
स्यादेवं मथुरापुरे सुविदिते वृन्दावने केवलम्।।

(१६)

भक्तिर्यातु सुभारते च द्रविड़े देशे स्वयं प्राणिवत्
गोलोकों ब्रजमण्डले प्रकटितो भूत्वा प्रतीक्षारतः।
स्यादेवं वसुदेव–देवकि–गृहे श्रीकृष्णनाम्नालयं
कृत्वा मर्त्य–वपुः करोमि वचनं यन्मे प्रियायाः प्रियम्।।

(१७)

श्री चैतन्यविहारभूमितिलके श्रीकृष्ण केलिस्थले
प्राचीने रमणस्थले पुनरहो चक्रे महन्मन्दिरम्।
माहात्म्यं पुनरस्य गीतमहहः प्राचार्यवर्य्यैः स्वयं
शास्त्रिश्रीवसुदेव–कृष्णविवुधः सम्प्रार्थ्यते दर्शनम्।।

❑ ❑ ❑ ❑

मौक्तिकानि अनुभवस्य

–डॉ० रमाशङ्करतिवारी
गन्धमादनम् २०, लक्ष्मणपुरी,
फैजाबादः (उ०प्र०)

(१)

विष्णुप्रियाया हृदयप्रियायाश्च रोहन्ति शिखरम्,
किल सत्तासुन्दर्याः प्रेष्ठाः भजन्ते मानं च विपुलम्।
अत्यानुकूला अतिलालिनः वै समश्नन्ति विभवम्,
अहो! सत्यशीलाश्चारित्र्यवन्तो भजन्तेऽपहासम्।।

(२)

'ईमानदारी'[1] सिध्यति ऋणात्मकस्तु मूल्यम्,
'बेईमानी' पुष्यति फलति इह लोके सतिमिरे।
'जुवेनल' इत्याख्यलैटिनकाव्यकारो लब्धप्रतिष्ठः
निगदति 'ईमानदारी' प्रशस्यते हन्ति खल्वाहारविरहेण।।

(३)

पदं राज्यसरण्यां मादयति नरं खलु सधौव्यम्,
विस्मरति मानवगुणग्रामं मार्दवसौहार्दश्लिष्टम्।
कादम्बरी राज्यश्रियोऽतिशयति प्रायिकां सुराञ्च,
पाश्चात्या संयमति पातारं पश्यामः कियत्कालम्,
पौर्व्विकी धारयत्यधिशासनं किल सर्वकालम्।।

(४)

लोकतन्त्रं प्रक्षिपति मनुगणं नवीनं भारतस्य व्योमनि,
नव्यनक्षत्राणि दीप्यन्ते राष्ट्रक्षितिजे मारयन्ति च मर्याम्।।
जातयः वर्गाः समाजाः कुलापाः छत्रायन्ते च बहुशः,
पुरातनात्मा समरसः समैक्यनिष्ठः दीर्यते खण्डं सखण्डम्।
कुत्र नयते लोकतन्त्रं भारतजननीं गान्धिना तु पुष्टाम्।।

(५)

विकसन्ति सुमनानि खलु जनशून्यदेशे,
विकिरन्ति माधुर्यपोषं शुष्के वै समीरे।
निगुहन्ति रत्नानि शुचिस्वच्छमयूखानि,
गह्वर्यः सतिमिराः खल्वमेयास्तु जलधेः।[2]
भाग्यधेयानि नृत्यन्ति जीवनरङ्गभूम्यां स्वेच्छया अहो तु।।

(1) "Honesty is praised and starved, (Juvenal)

(2) "Full many a flower is born to blush unseen and waste its sweetness on the desert air,
Full many a gem of purest ray serene, The dark unfathomed caves of ocean bear."
(Thomas Gray)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छत्रबन्ध–काव्यम्

–डॉ० वासुदेवकृष्णः चतुर्वेदी
गतश्रम टीला, मथुरा (उ० प्र०)

रसिकवरविहारी श्रीजि–सन्तापहारी
रतिपति मतिहारी कुञ्जक्रीडाविहारी।
शचिवति मदहारी गोपिकानन्दकारी
शतदल–रुचिधारी प्रीयतां गोष्ठचारी।।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाल–शिक्षा

–डा० बलवीरदत्तशास्त्री, साहित्यायुर्वेदाचार्यः
चिकित्सालयाध्यक्षः गौड़ब्राह्मण–आयुर्वेदमहाविद्यालयस्य
ब्राह्मणवास, रोहतक (हरियाणा)

(१)

अनुशिष्टौ स्वयं येषां पितरौ बालकास्तयोः।
अनुशास्या भविष्यन्ति मृद्भाण्डाविव सर्वदा।।

(२)

परितो वर्तमानास्ते लोकन्ते च परिस्थितीः।
शनैस्तूष्णीं निगीर्यन्ति लाला–ग्रन्थिरसानिव।।

(३)

यथा पश्यन्ति कुर्वन्तं महान्तं बालका अपि।
तथा कुर्वन्ति कर्माणि मेषं मेषोऽनुधावति।।

(४)

विधीयमानकार्यस्य गुणदोषौ न जानते।
ज्वलङ्गारसंग्राहं बालो वेत्ति न दाहकम्।।

(५)

कर्तव्यं पित्रोस्तस्मात् शिशुचेष्टां विनिर्दिशेत्।
भविष्यत्समये येन भवेयुस्तेषु शोभनाः।।

(६)

पाठशालाऽग्रिमा बाल्ये जायते सदने स्वकम्।
स्वमातापितरौ चैव ह्यादर्श मनुते शिशुः।।

(७)

जननी–जनकौ यद्याचरतः कर्म निन्दितम्।
तत्ज्ञात्वा व्यवहार्यं हि कुर्वते बालका अपि।।

(८)

बहवः पितरो ह्येतन्न विचिन्वन्ति कर्हिचित्।
क्व नः क्रीडन्त्यपत्यानि क्वानुधावन्ति नित्यशः।।

(९)

मातापित्रोरुपेक्षेयं बालगर्तावपातनी।
वस्त्राहारव्यवस्थैव नालमर्भकपालने।।

(१०)

पृथुकशासना पूर्वं स्वानुशासनमर्हति।
मिथो जनकसन्तत्योर्युज्यते प्रेमवर्तनम्।

(११)

भोजनादतिरिच्यन्ते प्रेमता ममता स्वता।
योग्यवर्त्मनिदेशत्वं बालेभ्यो नित्यमम्बया।।

(१२)

यत्राभिभावका बाह्यकर्मव्यापृतमानसाः।
उपेक्षिता किशोरास्तत्रासुःरक्षात्ममानिनः।।

(१३)

भविष्योज्ज्वलप्राप्त्यर्थं बालानां हितकारकम्।
स्वात्मनिर्भरतायैते यतेयुरवधानतः।।

(१४)

कार्येऽस्मिञ्जननी योग्यामापादयति भूमिकाम्।
स्वापत्योन्नतिलाभेषु जनको मूलकारणम्।।

(१५)

मातापित्रोः सुकर्तव्यं यत्र सौख्योपलब्धये।
तत्र योग्याभिलाषाप्तिर्बालानामहिता परम्।।

(१६)

पूर्णोचितविकासार्थं शिशूनामुचितं सदा।
स्वयं ते कर्ममार्गेषु प्रयतेयुः स्वशक्तितः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१७)

जननीजनकौ शश्वत् पुरस्तादात्मसन्ततेः।
शिष्टभाषां ब्रुवीतान्तु येन साप्यनुयातु तौ।।

(१८)

अतिथीनां समक्षे तु कीदृग्बालैर्विषीदनम्।
ज्ञेयं कीदृग् व्यवहार्यं महद्भिः साकमर्भकैः।।

(१९)

किं किं वाच्यमवाच्यञ्च सद्गोष्ठ्यामुपविश्य वै।
बालानां पुरतस्ततैर्न निन्द्यो उपवेशिनः।।

(२०)

दुष्प्रभावः पतेद्येन बाल–कोमलबुद्धिषु।
पितरौ चेत् कलहतस्तस्मात् हि परिवर्जयेत्।।

(२१)

मनःकायविकासायाऽवधेयमात्मसन्ततेः।
पाल्या पोष्या सदा चासावुत्तमाहारप्रापणैः।।

(२२)

संस्काराः शैशवे लब्धा जीवनान्ते त्यजन्ति न।
मृद्भाण्डानि न मुञ्चन्ति लक्ष्म यन्नूतने कृतम्।।

(२३)

इत्थं शिशुषु यद्बाल्ये चाधीयेतानुशासनम्।
अग्रे वयसि तन्नृणां स्वानुशासनमावहेत्।।

(२४)

यत्सदने सदा क्रूरौ पितरौ दुष्टभावनौ।
यद्गेहे कलहस्तत्र भीतिश्चित्तोपतिष्ठति।।

(२५)

वातावरणमेतन्तु सूनूनां द्रोहकारकम्।
हीनभावविषादौदासीन्ययुक्तं प्रजायते।।

(२६)

हीनभावमपाकर्तुं ह्याधातुमनुशासनम्।
अन्यबालस्य तुल्यत्वमात्मजेषु न कारयेत्।

(२७)

महतामपभाषा तु वाच्या न पुरतः शिशोः।
पितरौ प्रति बालानां हीनभावो मनः स्वतः।।

(२८)

मनःकायमतीनाञ्च विकासायात्मजन्मनाम्।
सावधाना भवेयुस्ते जननी–जनकाः भृशम्।।

(२९)

पितृषु प्रेमभावः स्यान्मार्दवं स्वसुतान् प्रति।
न मन्युर्न च काठिन्यं नाहंकारो न दुर्ग्रहः।।

(३०)

अस्मद् ध्येयो न बालानां शोधनं किन्तु निर्मितिः।
लालनेनैव सम्पाल्या ताडनेन न सर्वथा।।

(३१)

महत्त्वं सदनेष्वेव व्यक्तिरूपेण चार्भकः।
लभेयुस्तेन तेषान्तु चेतो बलमिहैधते।।

(३२)

समेषां तनुजानान्तु समानादर इष्यते।
दुराचार–जिहासार्थं स्वादर्शं स्थापयेन्ननु।।

(३३)

बालचारित्र्यनिर्माणं पञ्चाद्याब्देषु जायते।
तस्मादेतदवस्थायां सावधानः पिता भवेत्।।

(३४)

कैशोरागममस्त्येव कोमलं बालबुद्धिषु।
तीव्रां प्रतिक्रियां यच्छेदस्मिन्निरवधानता।।

(३५)

सन्तत्यग्रे कदाचित्तैर्नानुष्ठेयमनैतिकम्।
किशोरास्तूर्णमुह्यन्ति पितृकर्मशुभाशुभम्।।

(३६)

तदोल्लासश्च जिज्ञासा दुष्पथे प्रेरयेत् सुतान्।
अतः स्नेहेन बोधव्या जनकैरात्मना बुधैः।।

(३७)

मातरः पितरश्चैवमुपर्युक्तं न कुर्वते।
भारताभिजनाः सर्वे भवेयुर्नागराः शुभाः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निरुक्ते चित्रिता नार्यः

–मञ्जु कुमारी पाण्डेय
शोधछात्रा, राँची विश्वविद्यालयः,
राँची (छत्तीसगढ़)

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति महाभाष्यवचनेन षडङ्गयुक्तस्य वेदस्याध्ययनमध्यापनं विद्वद्भिः विहितम्। तत्र षडङ्गेषु शिक्षाकल्पव्याकरणछन्दोज्योतिष–निरुक्तञ्चेति प्रसिद्धम्। वेदस्याङ्गतया षडङ्गस्य परिगणनं वेदाङ्गेष्वपि भवति। तद्यथा पाणिनीयशिक्षायाम्–

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।
–पा० शि० ४२,४३

वेदाङ्गेषु निरुक्तस्य स्थानं महत्त्वपूर्णम्। निरुक्तं श्रोत्रमुच्यते, इति कथनेन निरुक्तस्य श्रोत्रत्वं प्रसिद्धम्। श्रोत्रस्य विषयोऽस्ति शब्दः। वेदेभ्यः समाम्नातानां शब्दानां संग्रहो निघण्टुपदवाच्यः प्रथमकोषग्रन्थरूपेण गण्यते। तेषां शब्दानां निर्वचनमेव निरुक्तस्य मूलप्रतिपाद्यं वर्तते। अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तमिति सायणाचार्यः कथयति।

साहित्यं समाजस्य प्रतिबिम्बभूतं यत्र समाजस्थानां वृत्तानां चित्रं दरीदृश्यते। समाजे मानवानां वृत्तं विशेषरूपेण गुम्फितं भवति। मानवेषु नारी महत्त्वपूर्णा यतो हि प्रकृतिपुरुषात्मकं जगदिदं प्रकृत्या एव सञ्चाल्यते। प्रकृतिर्नारीरूपा पुरुषो नररूपश्चेति सर्वत्र साहित्ये वर्णितमस्ति। वैदिकसाहित्ये नारी विशेषेण चित्रिता। श्रोत्रभूते निरुक्ते तु ऋग्वेदादीनां शब्दानां मन्त्राणां चोपस्थापनं निर्वचनं चिन्तनञ्च दृश्यते। तत्र निरुक्ते नार्यः विचार्यन्ते। यथा–

नारी–शब्दस्तु नरस्य स्त्रीलिङ्गरूपः, नर–शब्दात् ङीष् प्रत्ययेन निष्पद्यते। निरुक्ते नारी शब्दस्य प्रयोगो ऋग्वेदीयस्य मन्त्रस्य व्याख्यायां प्राप्यते। ऋग्वेदे प्रतिपादितमस्ति–

इन्द्राणीमासु नारिसु सुभगामहमश्नवम्।
नह्यस्या अपरञ्चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः।।
–ऋग्वेद १०/८६/११

तत्र यास्को ब्रूते– 'इन्द्राणीमासु नारीषु सुभगामहमशृणवं, नह्यस्या अपरामपि समां जरया म्रियते पतिः, सर्वस्मात् य इन्द्र उत्तरः श्रेष्ठः।' अत्र वर्णितमस्ति यत् नारीषु इन्द्राणि सुभगा वर्तते, यतो हि अस्याः पतिः न कदापि म्रियते। तदानीं सुभगा नारी पतियुक्ता आसीत्, विधवा च पतिवियुक्ता। विधवा इत्यस्य निर्वचनं यास्केन प्रतिपादितम्–

'धव इति पतिर्नाम, विगतो धवो यस्याः सा विधवा, विधातृका भवति, धारणपोषणकर्तृशून्या भवति।' तस्या धारणं पोषणञ्च न कोऽपि करोति। विधावनाद्वा पतिवियोगेन सा प्रकम्पिता भवति स्म विधवनाद्वा, प्रतिवियोगानन्तरं स पतिकुलात् पितृकुले पितृकुलात् पतिकुले धावमाना भवति स्म।' अनेन प्रतीयते यत् निरुक्त–काले विधवानां स्थितिः शोभना नासीत्।

(१) <u>कन्यारूपा नारी–</u>

नारीणां विविधा अवस्था निरुक्ते संदृश्यन्ते। तत्र कन्यारूपा नारी। विशेषेणोल्लेखनीया वर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कन्याया निर्वचने यास्कः कथयति यत् कन्या कमनीया भवति, सामान्येन सा कमनीया सौन्दर्येणोपेता सुन्दरी भवति। बालकानामपेक्षया कन्या सामान्येन विशेषेण च कमनीया भवति। कमनीयत्वात् सा सर्वै एषणीया वाञ्छनीया च भवति। क्वेयं नेतव्येति विवाहोऽस्या कुत्र कर्त्तव्य इति पिता चिन्तयति। प्रतीयते तदानीं कन्याया विवाहस्य कृते समस्या आसीदेव। कमनेनानीयत इति वा सा वरेणानीयत इति कन्या। विवाहानन्तरं कन्या पतिगृहे आनीयते। निरुक्ते प्राप्यते यत् कन्या काष्ठपादुकाया व्यवहारमपि करोति स्म। कन्याया पर्यायवाची शब्देषु कनीनका, कन्यका, कनी प्रभृतयः शब्दा निरुक्ते प्रयुक्ताः सन्ति।

कन्याया विवाहोऽग्निसन्निधौ भवतिस्म। अतोऽग्निरेव कन्याया कन्यात्वविनाशकः प्रथमत्वेनोपन्यस्तः। तदनन्तरं वरेण सह कन्याया विवाहो भवति स्म। विवाहानन्तरं सा कन्या वधूपदवाच्या भवति स्म। साम्प्रतमपि विवाहेऽग्निः साक्षीरूपेण तिष्ठति।

(२) जायारूपा नारी–

नारी जाया–रूपेणापि विख्याता। जाया शब्दस्यार्थो भवति पत्नी। यास्कः कथयति यत् कन्यानां जरयिता जनीनां पतिर्भवति। स पतिर्जायानां पालयिता विद्यते। यज्ञ–संयोगेन तत्प्रधाना भवति। 'पत्युर्नो यज्ञ–संयोगे' इत्यष्टाध्यायीसूत्रस्योपरि प्रभावो निरुक्तस्यैव दृश्यते। प्रतीयते पत्या सह पत्नी प्रतिदिनं यज्ञे सम्मिलिता भवति स्म। जायायाः विशेषणे सुवासाः, हसना, कल्याणी, भार्या, समना प्रभृतयः शब्दाः प्राप्यन्ते। अनेन वस्त्रालङ्कारयुक्ता सुवासाः, सर्वदैव प्रसन्नवदना, हासयुक्ता, हसना, शोभनभार्या, कल्याणीभार्या तथा स्मयमना समानमना वा समना प्रभृतयः शब्दा विशेषरूपेण प्रयुक्ताः सन्ति। रूपयौवनसम्पन्ना योषा कल्याणी पदवाच्या भवति स्म।

(३) भगिनी रूपा नारी–

भगिनी रूपेण नारी जामिशब्देनापि विश्रुता आसीत्। जामिरूपेऽस्यां जनयन्ति जमतेर्वा स्याद् गतिकर्मणः, निर्गमनप्राया भवति। दुहितुर्दायभागस्य प्रतिषेधोऽपि तत्र प्राप्यते। केचन पुत्रिकाया ज्येष्ठापत्यस्यैव दायस्याधिकार इति कथयन्ति। दुहिता दायस्याधिकारी तदानीं नासीदिति समर्थने मन्त्रोऽयं प्रस्तूयते–

न जामये तान्वो रिक्थमारैक् चकार गर्भं सनितुर्निधानम्।
यदी मातरो जनयन्त वह्निमन्यः कर्त्ता सुकृतोरन्यऋन्धन्।।

– ऋग्वेद ३/३१/२

कन्या दुहिता भवति स्म। दुहितुर्निर्वचने यास्कः कथयति 'दुहिता दुर्हिता दूरे हिता दोग्धेर्वा। धारणे साऽहितकारिणी भवति। पितुः दूरे स्थिता सा हितकारिणी भवति। पुनश्च सा पितृकुलात् धनमाहरतीति।' प्रतीयते तदानीं दुहिता गोः दोहनमपि करोति स्म। अनेनैव दुग्धा दुहितेति कथ्यते यास्केन। एकस्मिन् मते यास्कः कथयति यत् अङ्गादङ्गात् संभूतस्य हृदयादधिजातस्य मातरि प्रत्यृतस्य विधाने सत्यमेव विदुषां निष्कर्षो विद्यते यत् समानभावेन पुत्रः पुत्री च दायस्याधिकारीति अविशेषेण मिथुनाः पुत्रा दायदा इति। तत्र प्राप्यते–

अविशेषेण पुत्राणां दायो भवति धर्मतः।
मिथुनानां निसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्।।

–निरुक्त ३/१

पुत्राणां मिथुनानामुभयेषां स्त्रीपुंसां दायो भवतीति निसर्गादौ सृष्ट्यादौ स्वायम्भुवो मनुरब्रवीत्। अनेन दुहितुर्दायादत्वं स्वीकृतम्।

स्त्रीणां कृते शब्दद्वयं प्रयुक्तं भवति–मेना, उना इति। स्त्री–शब्दः स्त्यायतेरपत्रपणकर्मणो लज्जार्थस्य बोधकः। यतो हि स्त्रियः स्वभावेन लज्जाशीला भवन्ति। तदानीमपि स्त्रियः शीलेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शोभन्ते स्म। मेना इत्यस्य मानयन्त्येनाः पुरुषा एना मानयन्तीति सम्मानं कुर्वन्तीति। उना इत्यत्र गच्छन्त्येना पुरुषा एनाः प्रति गच्छन्तीति। अनेन स्पष्टं भवति यत् निरुक्तकाले स्त्रियः सम्मानार्हा आसन्। पुरुषेणापि सा सम्मानिता भवति स्म। समाजे नारीणां समादरः आसीत्।

अभ्रातृका, अभ्रातृमती कन्या वा पितृ–धनस्याधिकारिणी भवति स्म। यतो हि दुर्गाचार्येण कथितम्–'यैवाभ्रातृका भवति कन्या सैव पित्र्यं धनमर्हति नेतरा सभ्रातृका यतो भ्रातुरभावे तस्याः पुत्र एव तत्पित्रे पिण्डदो भवति। अभ्रातृका कन्या पितृगृहे एव तिष्ठति। यथा निरुक्ते–

अमूर्या यन्ति जामयः सर्वा लोहितवाससः।
अभ्रातर इव योषास्तिष्ठन्ति हतवर्त्मनः।।

–अथर्व १/१७/१

तत्र यास्कः अभ्रातृका इव योषास्तिष्ठन्ति सन्तानकर्मणे पिण्डदानाय हतवर्त्मनः।

अपुत्रा अपतिका अपि नार्यस्तदा कष्टमयं जीवनं यापयन्ति स्म। यथा दाक्षिणात्री दाक्षिणात्यस्त्री गर्तारोहिणी सनये धनानां लब्धये इति तत्र सूचितम्। दक्षिणदेशे अपुत्रिकाया अपतिकायाश्च कृते परीक्षानन्तरं धनस्य व्यवस्था भवति स्म राजकोषात्। सत्यस्यान्वेषणे सा गर्वारूढा प्रश्नैस्ताड़िता भवति स्म।

(४) मातृरूपा नारी–

मातृरूपा नार्योऽपि निरुक्ते विशेषरूपेण वर्णिताः सन्ति। तत्र माता पिता निर्मीयन्तेऽस्मिन् भूतानि अनेन माता पुत्रादीनां निर्मात्री भवति। पुत्रो मातुर्योना गर्भाशयस्थाने तस्यारशितपीत–लीढभक्षितेन जठरे चतुर्विधाहारपरिणामेन परिवीतो जरायुणा परिवेष्टितो यथाकालं जायते। माता पुत्रं पुत्रीं वा जनयति। पुत्रस्तस्या आत्मजः, पुत्री च आत्मजा भवति। मातृशब्दस्य कृते निरुक्ते ननान्दृ–शब्दोऽपि प्रयुक्तो विद्यते। यतो हि माता दुग्धादि प्रदानार्थं सन्तानं प्रति नमति। पीप्यानाशब्दोऽपि दुग्धं पाययमानायाः कृते प्रयुक्तः। सा माता पीप्याना भवति, या स्वसन्ततये दुग्धं दातुं नमति, दुग्धपानञ्च कारयति।

नार्योऽपि तदानीं विविधकार्येषु कार्यरता भवन्ति स्म। गृहपत्नीरूपेण स्थिता सा अद्मसत् शब्देनान्ननिर्माणे संलग्ना भवति स्म। अद्मसानिनि अन्नादात्री अद्मसादिनी अन्नप्रापयित्री सा नितरां समाजस्य कल्याणाय आसीत्।

निरुक्तकाले सगोत्रीया कन्या विवाहयोग्या नासीत्। भगिन्या सह विवाहस्य मान्यता तदानीं नासीत्! अतः प्रतीयते कन्याया विवाहः परगोत्रे भवति स्म। निरुक्ते देवस्त्रीणां मध्ये इन्द्राणी, सूर्या, यमी, अदिति, लक्ष्मी, अप्सरा, उर्वशी, वरुणानी, अग्नायी, उषासानक्ता, देव्या, होतारा, देवी, ऊर्जाहुति प्रभृति नार्यो विशेषरूपेण वर्णिताः।

निरुक्तकाले स्त्रियः सूत्रनिर्माणे कार्यरता भवन्ति स्म। तदानीं वस्त्रनिर्माणकार्यमपि भवतिस्म। वस्त्रेणालङ्कृता नार्यः सुवासा भवन्तीति वर्णितम्। अन्ननिर्माणे भोजननिर्माणे तासां चर्चा विशेषरूपेण प्राप्यते। सक्तुकारिकायाः कृते उपलप्रक्षेपिणी, उपलप्रक्षिणी–शब्दस्य प्रयोगो दृश्यते। उपलेषु यवान् प्रकर्षेण क्षिणाति हिनस्ति पिनष्टीति उपलप्रक्षिणी अथवा उपलप्रक्षेपिणी उपलेषु प्रक्षिपतीति वा।

अनेन प्रतीयते यत् निरुक्ते नार्यो विविधरूपेण चित्रिताः सन्ति। मातृरूपा नार्यः सम्मान्नार्हाः समाजे उच्चस्थानं दधति स्म। जाया–रूपा, पत्नी–रूपा वा नारी यज्ञादिसम्पादनेऽपि सम्मिलिता भवतिस्म पत्या सह। सुवासा जाया पत्ये सर्वसुखं प्रदाय नितरां गौरवान्विता भवति स्म। परं तदानीं अभ्रातृकायाः अपतिकायाः विधवायाः स्थितिः शोभना नासीदिति संक्षेपेण नार्यः विवेचिताः।

❑ ❑ ❑ ❑

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाविद्यालय–समाचाराः

राष्ट्रियसेवायोजनायाः समारम्भः

हर्षस्य विषयोऽयं विद्यते यत् ज्वालापुरीयगुरुकुलमहाविद्यालये स्नातकस्तरीयशास्त्रिपाठ्यक्रमे पिपठिषूणां छात्राणां कृते राष्ट्रियसेवायोजनायाः समारम्भः सञ्जातः। योजनयानया शास्त्रिपरीक्षायामध्ययनरतानां छात्राणां विविध–सामाजिककार्यकलापानां विकासार्थं सहयोगः सम्प्राप्तो भविष्यति।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य राष्ट्रियसेवायोजनायाः समन्वयकस्य डा० गङ्गाधरपण्ड्या महोदयस्य निर्देशमनुसृत्य ज्वालापुरीयगुरुकुलमहाविद्यालयस्य प्राचार्येण डा० हरिगोपालशास्त्रिणास्याः योजनायाः सम्यक् सञ्चालनार्थं 'कार्यक्रमाधिकारी' इति पदे गुरुकुलमहाविद्यालयस्यैव हिन्दी विषयस्य प्राध्यापकस्य डा० सुरेशचन्द्रत्यागिनः नियुक्तिः कृता वर्तते। आशासे योजनयानया स्नातकस्तरीयाणां छात्राणां सामाजिक–बौद्धिक–कार्यकलापेषु नूनमेव विकासो भविष्यति।

आर्यकिशोर–विद्वत्कलापरिषदः प्रथमाधिवेशनम्–

आर्यकिशोरपरिषदः विद्वत्कलापरिषदश्च प्रथमाधिवेशनं २१–१२–२००१ तमे दिनाङ्के समायोजितमभवत्। कार्यक्रमस्याध्यक्षता डा० केशवप्रसादोपाध्यायेनोपाचार्येण विहिता। कार्यक्रमस्य संयोजनं ब्र० मनोकान्तशर्मणा कृतम्।

मुख्यातिथिपदात् कुलसचिवेन डा० अजय–कौशिकमहोदयेन निगदितं यत् छात्रैः विद्वत्कलापरिषदः माध्यमेन वाग्वर्धनार्थं सततं प्रयासः करणीयः। साहित्यप्राध्यापकेन झोपाद्धेन सुमनकुमारेणावसरेऽस्मिन् निगदितं यत् सर्वैरपि छात्रैः पठने, लेखने, भाषणे च रुचिः समुत्पादनीया। भाषणप्रवीणाः छात्राः समाजे प्राप्तादराः भवन्ति। कार्यक्रमेऽस्मिन् नैके छात्राः भाषणं, गीतं, सङ्गीतं, विविधज्ञानवर्द्धककार्यक्रमादिकञ्च प्रस्तुतवन्तः। अवसरेऽस्मिन् सर्वेऽपि प्राध्यापकाः, अध्यापकाः छात्राश्च समुपस्थिताः आसन्।

साहित्यविभागाध्यक्षेणोपाचार्येण च डा० केशवप्रसादोपाध्यायेन कार्यक्रमस्याध्यक्षपदात् निगदितं यत् सर्वैरेव छात्रैः वाग्वर्धनार्थं, लेख–लेखनार्थञ्च विद्वत्कलापरिषदः माध्यमेन प्रयासाः करणीयाः। छात्राणामन्येषाञ्च नराणां जीवने वकारस्य महत्त्वं वर्णयता तेन कथितं यत्–

वस्त्रेण वपुषा वाचा विद्यया विनयेव च।
वकारैः पञ्चभिर्युक्तो नरो याति महार्घताम्।।

डॉ० मण्डनमिश्राः दिवङ्गताः

अशोभनीयङ्कष्टकरञ्च वृत्तमिदं सूच्यते यत् संस्कृतस्यप्रकाण्डपण्डिताः, राजस्थानसंस्कृतविश्व–विद्यालयस्य प्रथमकुलपतयः पण्डित मण्डनमिश्राः दिवङ्गताः। जयपुर–जनपदस्य हनुतियाग्रामे १९२९ ई० वर्षे जूनमासस्य सप्तमे दिनाङ्के प्रादुर्भूताः डॉ० मिश्रवर्याः विश्वविद्यालयत्रयस्य कुलपतयः आसन्। वर्षेऽस्मिन् फरवरीमासे राजस्थानसंस्कृतविश्व–विद्यालयस्य प्रथमकुलपतिपदे नियुक्ताः ते १९९२ तमे वर्षे नवदिल्यां श्रीलालबहादुरशास्त्रि–संस्कृतविद्यापीठस्य स्थापनां विहितवन्तः। ते विद्यापीठस्य प्रथमकुलपतिः आसन्। वाराणसेयस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्यापि कुलपतिपदं समलङ्कृतं तेन। विगतवर्षे महामहिमराष्ट्रपतिमहोदयेन संस्कृतस्य विशिष्टसेवायै **पद्मश्री** उपाधिरपि प्रदत्ता। 'भारतोदयः' संस्कृतपत्रिकामाध्यमेन श्रद्धाञ्जलिं समर्पयामि।

–डॉ० जगदीशशर्मा
केन्द्रियविद्यालयः भरतपुरम् (राजस्थानम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

BHARATODAYA
R.N.I. Regd No.-UPBIL/1998/1485
Postal Regd No.-DN/RO-167/2001

❀ वेदनाऽनुभूयते ❀

—डॉ० केशवप्रसादगुप्तः
चरवा, कौशम्बी (उ० प्र०)

कीदृशी निशाचरी वेदनाऽनुभूयते।
आगताऽपि योजना कल्पना प्रतीयते।।

(१)

धर्मवादपञ्जरे माधवो विराजते,
क्षेत्रवादकोटरे दानवः प्रमोदते।
जातिवादपोषिता पूतना महीयते,
कीदृशी निशाचरी वेदनाऽनुभूयते।।

(२)

द्वेषरागकीर्तिता मन्त्रणा सुपूज्यते,
कूटनीतिपण्डिता मन्थराऽपि लज्जते।
मन्त्रिणां विमोहिनी वञ्चना प्रगीयते,
कीदृशी निशाचरी वेदनाऽनुभूयते।।

(३)

आर्थिकी विडम्बना सेवया न तृप्यते,
प्रार्थिनां सुयोग्यता लोलुपैर्न गण्यते।
अङ्गणे निवेदिता सूचना वरीयते,
कीदृशी निशाचरी वेदनाऽनुभूयते।।

(४)

मानवीयमान्यता दानवैर्विदीर्यते,
सम्प्रतीह सार्थकं जीवनं न जीव्यते।
अग्रजैर्निरन्तरं सान्त्वना प्रदीयते,
कीदृशी निशाचरी वेदनाऽनुभूयते।।

(५)

भ्रष्टनीतिपोषकः शोषकः प्रशंसते,
शान्तिमार्गसेवकः 'केशवो' विनिन्द्यते।
ज्वारयुक्तसागरे साधना विज्ञीयते,
कीदृशी निशाचरी, वेदनाऽनुभूयते।।

हरिद्वारस्थितस्य ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य मुखपत्रम्

भारतोदयः (संस्कृत–मासिकम्)

P.O. गुरुकुलमहाविद्यालयः 2494905
हरिद्वारम् (उत्तराञ्चलम्)

सेवायाम्,

श्री.....

२५० श्री पुस्तकालयाध्यक्ष
वाल्मीकि संस्कृत विद्यापीठ
प्रदर्शनी मार्ग,
काठमाण्डू (नेपाल)

❀ महामना मदनमोहनमालवीयः ❀

—डा० हरिगोपालशास्त्री, प्राचार्यः
ज्वालापुरीय गुरुकुलमहाविद्यालयस्य हरिद्वारस्थस्य

आसीत् पुरा भारत–भारतेऽस्मिन्
स्वराष्ट्रभूमेः परिपोषकश्च।
तेष्वेव जातो जननायकोऽयं,
महामनामोहन–मालवीयः।।

देशे–विदेशे परम–प्रचारः
कृतः सदा येन स्वसंस्कृतेश्च।
संस्थाप्य संस्थाः विविध–प्रदेशे
महात्मनाकारि महोपकारः।।

मुद्रकेण, प्रकाशकेन डा० हरिगोपालशास्त्रिणा कनखलस्थे 'गोल्डन टैम्पल आफसेट प्रेस' मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं मुखपत्रं प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीयगुरुकुलमहाविद्यालयसभया।

सम्पादकः डॉ० हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu